इति हेमचन्द्रः ॥ (यथा, कथासरित्सागरे । १ । ५८ ।
"निपत्य पादयोस्ताभ्यां जयया सह बोधिता । शापान्तं प्रति शर्वाणी शनैर्वचनमब्रवीत् ॥")
दन्त्यसादिरप्ययं शब्दः ॥

शर्शरीकः, पुं, (शॄ + "शॄपॄवृञां शेरुक् चाभ्यासस्य ।" उणा० ४ । १९ । इति ईकन् द्वित्वमभ्यासस्य रुक् च ।) हिंस्रः । खलः । इत्युणादिकोषः ॥ अश्वः । मङ्गलाभरणम् । अग्निः । इति संक्षिप्तसारोणादिवृत्तिः ॥

शल, वेगे । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) शलति । इति दुर्गादासः ॥

शल, क ङ श्लाघे । इति कविकल्पद्रुमः ॥ (चुरा०-आत्म०-सक०-सेट् ।) क ङ, शालयते पण्डितं धीरः । इति दुर्गादासः ॥

शल, ङ चलने । स्तृतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-अक०-सक०-च-सेट् ।) ङ, शलते । चलनं कम्पः । स्तृतिरिह संवरणम् । इति दुर्गादासः ॥

शल, ज गतौ । इति कविकल्पद्रुमः ॥ (भ्वा०-पर०-सक०-सेट् ।) ज, शालः शलः । इति दुर्गादासः ॥

शलं, क्ली, (शल + "ज्वलितिकसन्तेभ्यो णः ।" ३ । १ । १४० । इति णः ।) शल्लकीलोम । सजारुकाँटा इति भाषा । तत्पर्य्यायः । शलली २ शललम् ३ । इत्यमरः ॥

शलः, पुं, शललम् । भृङ्गी । चेत्रभेदः । ब्रह्मा । इति मेदिनीशब्दरत्नावल्यौ ॥ कुन्तास्त्रम् । इति त्रिकाण्डशेषः ॥ उष्ट्रः । इति हेमचन्द्रः ॥ (वासुकिवंशीयसर्पविशेषः । यथा, महाभारते । १ । ५७ । ५ ।
"कोटिशो मानसः पूर्णः शलः पालो हलीमकः"
शन्तनुराजपुत्रः । यथा, भागवते ।९।२२।१८ ।
"शलश्च शन्तनोरासीत् गङ्गायां भीष्म आत्मवान् ।"
शल्यराजः । यथा, भागवते । १ । १५ । १६ ।
"नमृत्रिगर्त्तशलसैन्धववाह्लिकाद्यैः ॥"
कंसामात्यः । यथा, तत्रैव । १० । ३६ । २१ ।
"ततो मुष्टिकचाणूरशलतोशलकादिकान् ॥")

शलकः, पुं, मर्कटः । इति त्रिकाण्डशेषः ॥ माकड़्सा इति भाषा ॥

शलङ्गः, पुं, लोकपालः । लवणविशेषः । इत्युणादिकोषः ॥

शलभः, पुं, (शल + "कृशृशलिकलिगर्द्दिभ्योऽभच् ।" उणा० ३ । १२२ । इति अभच् ।) कीटविशेषः । फड़िं इति पङ्गपाल इति च भाषा । तत्पर्य्यायः । पतङ्गः २ । इत्यमरः ॥ पताङ्गः ३ पताङ्गः ४ । इति शब्दरत्नावली ॥ स तु ईतिविशेषः । यथा,—
"अतिवृष्टिरनावृष्टिः शलभा मूषिकाः खगाः । प्रत्यासन्नाश्च राजानः षड़ेते ईतयः स्मृताः ॥"
इति ज्योतिस्तत्त्वम् ॥

(असुरविशेषः । यथा, हरिवंशे । ३ । ८८ ।
"शरभः शलभश्चैव विप्रचित्तिश्च वीर्य्यवान् ॥")

शललं, क्ली, (शल चलनसंवरणयोः + वृषादित्वात् कलः ।) शलम् इत्यमरः ॥

शलली, स्त्री, (शलल + गौरादित्वाज्जातित्वाद्वा ङीष् ।) शलम् इत्यमरः ॥ शली । इति राजनिर्घण्टः ॥

शलाका, स्त्री, (शल + "बलाकादयश्च ।" उणा० ४।१४। इति आकः । स्त्रियां टाप् ।) शल्यम् । मदनवृक्षः । शारिका । शल्लकी । छत्रादिकाष्ठी । (यथा, गुरुगीतायाम् ।
"अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया । चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ॥")
शरः । इति मेदिनी ॥ आलेख्यकूर्चिका । इति हेमचन्द्रः ॥ अस्थि । इति शब्दचन्द्रिका ॥

शलाकापरि, व्य, शलाकाक्रीड़ायां पराजयः । यथा । "अक्षशलाकासंख्याः परिणा ।"२।१।१०। द्यूतव्यवहारे पराजये एवायं समासः । अक्षे विपरीतं वृत्तम् । अक्षपरि । एवं शलाकापरि । एकपरि । इति सिद्धान्तकौमुदी ॥ अपि च । "नन्वेकस्याक्षस्य शलाकाया वा यथा पूर्वं तथा यथा तेऽन्यथापातनमित्यर्थे अक्षपरि शलाकापरि इत्यव्ययीभावेऽव्याप्तिस्तयोरव्ययगर्भत्वेऽपिचाव्ययपूर्वत्वाभावात् ।" इति शब्दशक्तिप्रकाशिका ॥

शलाकापुरुषाः, पुं, जैनानां त्रिषष्टिदेवपुरुषाः । तत्र द्वादश चक्रवर्त्तिनः । चतुर्विंशतिर्जिनाः । नव वासुदेवाः । नव बलदेवाः । नव प्रतिवासुदेवाश्च । यथा,—
"यः सर्वमण्डलस्येशो राजसूयश्च योऽयजत् । चक्रवर्त्ती सार्वभौमस्ते तु द्वादश भारते ॥
आर्षभिर्भरतस्तत्र सगरस्तु सुमित्रभूः । मघवा वैजयिरथाश्वसेननृपनन्दनः ॥
सनत्कुमारोऽथ शान्तिकुन्थुररोजिना अपि । सुभूमस्तु कार्त्तवीर्य्यः पद्मः पद्मोत्तरात्मजः ॥
हरिषेणो हरिसुतो जयो विजयनन्दनः । ब्रह्मसुतुर्ब्रह्मदत्तः सर्वे चेक्ष्वाकुवंशजाः ॥
प्राजापत्यस्त्रिपृष्ठोऽथ द्विपृष्ठो ब्रह्मसम्भवः । स्वयम्भू रुद्रतनयः सोमभूः पुरुषोत्तमः ॥
शैविः पुरुषसिंहोऽथ महाशीरः समुद्भवः । स्यात् पुरुषपुण्डरीको दत्तोऽग्निः सिंहनन्दनः ॥
नारायणो दाशरथिः कृष्णस्तु वसुदेवभूः । वासुदेवा अमी कृष्णा नव शुक्ला बलास्त्वमी ॥
अचलो विजयो भद्रः सुप्रभश्च सुदर्शनः । आनन्दो नन्दनः पद्मो रामो विष्णुद्विषस्त्वमी ॥
अश्वग्रीवस्तारकश्च मेरको मधुरेव च । निशुम्भबलिप्रह्लादलङ्केशमगधेश्वराः ।
जिनः सह त्रिषष्टिः स्युः शलाकापुरुषा अमी ॥"
इति हेमचन्द्रः ॥

शलाटः, पुं, शकटपरिमाणम् । यथा,—
"तुलापलशतं तासां विंशत्या भार आचितः । शकटः शाकटीनश्च शलाटस्ते दशाचितः ॥"
इति हेमचन्द्रः ॥

शलाटुः, त्रि, अपक्वफलम् । इत्यमरः ।२।४।१५॥ (यथा, सुश्रुते । १ । ४३ ।
"मदनशलाटुचूर्णान्येवं वा वकुलरम्यकोपयुक्तानि मधुलवणयुक्तानीति ॥")

शलाटुः, पुं, मूलविशेषः । इत्युणादिकोषः ॥ बिल्वः इति राजनिर्घण्टः ॥

शलाभोलिः, पुं, उष्ट्रः । इति हेमचन्द्रः ॥

शलालु, क्ली, सुगन्धिद्रव्यविशेषः । इति सिद्धान्तकौमुदी ॥

शलालुकः, त्रि, शलालुना क्रीतं वस्तु । यथा । "शलालुनोऽन्यतरस्याम् ।" ४। ४ । ५४। इति पक्षे ठक् । शलालुकः । शलालुकी । शालालुकः । शालालुकी । शलालु सुगन्धिद्रव्यविशेषः । इति सिद्धान्तकौमुदी ॥

शली, स्त्री, (शलं शल्लकीलोम अस्त्यस्या इति । शल + अच् । ङीष् ।) स्वल्पशल्यकः । तत्पर्य्यायः । शलली २ श्वावित् ३ । अस्य मांसगुणाः । गुरुत्वम् । स्नैग्ध्यत्वम् । शीतलत्वम् । कफपित्तनाशित्वञ्च । इति राजनिर्घण्टः ॥

शल्कं, क्ली, (शल चलने स्तृतौ + "इण्भीकापाशल्यतिमर्च्चिभ्यः कन् ।" उणा० ३ । ४३ । इति कन् ।) खण्डम् । वल्कलम् । इत्यमरः ॥ मत्स्यत्वक् । आँइस इति भाषा । यथा,—
"शल्कं स्यात् वल्कले खण्डे शल्कन्तु मत्स्यवल्कले ॥"
इति भरतधृतकोषः ॥ (यथा, महाभारते । १२ । ३६ । २३ ।
"अभक्ष्या ब्राह्मणैर्मत्स्याः शल्कैर्ये वै विवर्जिताः ॥")

शल्कलं, क्ली, मत्स्यवल्कलम् । वृक्षत्वक् । शलधातोः कलच्प्रत्ययेन निष्पन्नमेतत् । इति सिद्धान्तकौमुदी ॥

शल्कली, [न्] पुं, (शल्कलमस्यास्तीति । शल्कल + इनिः । (मत्स्यः । इति हेमचन्द्रः ॥

शल्की, [न्] पुं, (शल्कमस्यास्तीति । शल्क + इनिः ।) मत्स्यः । इति हेमचन्द्रः ॥

शल्पदा, शल्पपर्णिका, } स्त्री, मेदा । इतिराजनिर्घण्टः

शल्भ, ङ कत्थने । इति कविकल्पद्रुमः ॥ (भ्वा० आत्म०-सक०-सेट् ।) ङ शल्भते । कत्थनं प्रशंसा । इति दुर्गादासः ॥

शल्मलिः, पुं, शाल्मलीवृक्षः । (यथा, वाजसनेयसंहितायाम् । २३ । १३ । "शाल्मलिर्वृद्ध्या ।"
"शाल्मलिवृक्षविशेषो वृद्ध्या त्वामवतु शल्मलिर्वनस्पतीनां वर्षिष्ठं वर्द्धते इति श्रुतेः ।"
इति तद्भाष्यम् ॥)

शल्मली, स्त्री, शाल्मलिवृक्षः । यथा,—
"शल्मलिः स्यात् शाल्मलिश्च शाल्मली शल्मली तथा ॥"
इति भरतद्विरूपकोषः ॥

शल्यं, क्ली, (शलति चलतीति । शल + "सानसिवर्णसिपर्णसीति ।" उणा० ४ । १०७ । इति